अपि च ।
"उद्धृताभोमृत्तिकाभ्यामित्थं नारद यत्नतः ।
कृत्वोत्सर्गं ततः कुर्य्यात् शौचं मूत्रपुरीषयोः ॥"
इति पाद्मोत्तरखण्डे १०९ अध्यायः ॥
प्रसङ्गादशौचञ्चात्र लिख्यते ।
व्यास उवाच ।
"दशाहं प्राहुरशौचं सपिण्डेषु विपश्चितः ।
मृतेषु वाथ जातेषु ब्राह्मणानां द्विजोत्तमाः ॥
नित्यानि चैव कर्म्माणि काम्यानि च विशेषतः ।
न कुर्य्याद्विहितं किञ्चित् स्वाध्यायं मनसापि च ॥
शुचीनक्रोधनांस्त्वन्यान् शालाग्नौ भावयेद्द्विजान् ।
शुष्कान्नेन फलैर्व्वापि वैतानाञ्जुहुयात्ततः ॥*॥
न स्पृशेयुरिमानन्ये न च तेभ्यः समाहरेत् ।
चतुर्थे पञ्चमे वाह्नि संस्पर्शः कथितो बुधैः ॥
सूतके तु सपिण्डानां संस्पर्शो न प्रदुष्यति ।
सूतकं सूतिकाञ्चैव वर्जयित्वा नृणां पुनः ॥
दशाहं निर्गुणे प्रोक्तमशौचं चातिनिर्गुणे ।
एकद्वित्रिगुणैर्युक्तं चतुस्त्र्येकदिनैः शुचिः ॥
दशाहात्तु परं सम्यगधीयीत जुहोति च ।
चतुर्थे तस्य संस्पर्शं मनुः प्राह प्रजापतिः ॥*॥
क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्म्मरणान्तमशौचकम् ॥*॥
त्रिरात्रं दशरात्रं वा ब्राह्मणानान्तु शौचकम् ।
प्राक् संस्कारात् त्रिरात्रं स्यादस्मादूर्द्ध्वं दशाहकम् ॥
ऊनद्विवार्षिके प्रेते मातापित्रोस्तदिष्यते ।
त्रिरात्रेण शुचिस्त्वन्यो यदि ह्यत्यन्तनिर्गुणः ॥
अदन्तजातमरणे पित्रोरेकाहमिष्यते ।
जातदन्ते त्रिरात्रं स्याद्यदि स्यातान्तु निर्गुणौ ॥
आदन्तजननात् सद्य आचूड़ादेकरात्रकम् ।
त्रिरात्रमौपनयनात् सपिण्डानामुदाहृतम् ॥
जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः ।
सद्यःशौचं सपिण्डानां कर्त्तव्यं सोदरस्य च ॥
ऊर्द्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः ।
अथोर्द्ध्वं दन्तजननात् सपिण्डानामशौचकम् ॥
एकाहं निर्गुणानान्तु चूड़ादूर्द्ध्वं त्रिरात्रकम् ।
अदन्तजातमरणं सम्भवेद्यदि सत्तमाः ॥
एकरात्रं सपिण्डानां यदि तेऽत्यन्तनिर्गुणाः ।
व्रतादेशात् सपिण्डानामर्व्वाक् स्नानं विधीयते ।
सर्व्वेषामेव गुणिनामूर्द्ध्वन्तु विषमं पुनः ॥*॥
अर्व्वाक् षण्मासतः स्त्रीणां यदि स्याद्गर्भसंस्रवः ।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम् ॥
अतऊर्द्ध्वन्तु पतने स्त्रीणां स्याद्दशरात्रकम् ।
सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः ॥
गर्भच्युतावहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे ।
यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः ॥*॥
यदि स्यात् सूतके सूतिर्म्मरणे वा मृतिर्भवेत् ।
शेषेणैव भवेच्छुद्धिरहःशेषे त्रिरात्रकम् ।
मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥
अवृद्धिमदशौचमूर्द्ध्वञ्चेन्नेन शुध्यति ।
अथ चेत् पञ्चमीं रात्रिमतीत्य परतो भवेत् ।
अवृद्धिमदशौचं तदा पूर्व्वेण शुध्यति ॥*॥
देशान्तरगतं श्रुत्वा सूतकं शावमेव तु ।
तावदप्रयतो मर्त्यो यावच्छेषः समाप्यते ॥*॥
अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम् ।
तथैव मरणे स्नानमूर्द्ध्वं संवत्सराद्यदि ॥
वेदार्थविद्धीयानो योऽग्निमान् वृत्तिकर्षितः ।
सद्यःशौचं भवेत्तस्य सर्व्वावस्थासु सर्व्वदा ॥
स्त्रीणामसंस्कृतानान्तु प्रदानात् परतः सदा ।
सपिण्डानां त्रिरात्रं स्यात् संस्काराद्भर्त्तुरेव च ॥
अहस्त्वदत्तकन्यानामशौचं मरणे स्मृतम् ।
ऊनद्विवर्षान्मरणे सद्यःशौचमुदाहृतम् ॥
आदन्तात् सोदरे सद्य आचौड़ादेकरात्रकम् ।
आप्रदानात् त्रिरात्रं स्याद्दशरात्रमतः परम् ॥
मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ।
एकोदकानां मरणे सूतके चैतदेव हि ।
पक्षिणी योनिसम्बन्धे बान्धवेषु तथैव च ॥
एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचारिणाम् ।
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः ॥
गृहे मृतासु दत्तासु कन्यकासु त्र्यहं पितुः ।
परपूर्व्वासु भार्य्यासु पुत्रेषु कृतकेषु च ॥
त्रिरात्रं स्यात्तथाचार्य्ये स्वभार्य्यास्वन्यगासु च ॥
आचार्य्यपुत्रे पत्न्याञ्च अहोरात्रमुदाहृतम् ॥
एकाहं स्यादुपाध्याये स्वग्रामे श्रोत्रियेऽपि च ।
त्रिरात्रमसपिण्डेषु स्वगृहे संस्थितेषु च ॥
एकाहं वा श्वशुर्य्ये स्यादेकरात्रञ्च शिष्यके ।
त्रिरात्रं श्वश्रूमरणे श्वशुरे चैतदेव हि ॥
सद्यःशौचः समुद्दिष्टं सगोत्रे संस्थिते सति ॥*॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥*॥
क्षत्रविट्शूद्रदायादा ये स्युर्व्विप्रस्य बान्धवाः ।
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
स्वमेव शौचं कुर्य्यातां विशुद्ध्यर्थं न संशयः ॥
सर्व्वेतूत्तमवर्णानां शौचं कुर्य्युरतन्द्रिताः ।
उद्वर्णविधिदृष्टेन स्वन्तु शौचं स्वयोनिषु ॥
षड्रात्रं वा त्रिरात्रं स्यादेकरात्रं क्रमेण तु ।
वैश्यक्षत्त्रियविप्राणां शूद्रेष्वाशौचमेव तु ॥
अर्द्धमासोऽथ षड्रात्रं त्रिरात्रं द्विजपुङ्गवाः ।
शूद्रक्षत्त्रियविप्राणां वैश्येष्वाशौचमिष्यते ॥
षड्रात्रं द्वादशाहञ्च विप्राणां वैश्यशूद्रयोः ।
अशौचं क्षत्त्रिये प्रोक्तं क्रमेण द्विजपुङ्गव ॥
शूद्रविट्क्षत्त्रियाणान्तु ब्राह्मणे संस्थिते सति ।
दशरात्रेण शुद्धिः स्यादित्याह कमलोद्भवः ॥*॥
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
अशित्वा च सहोषित्वा दशरात्रेण शुध्यति ॥
यद्यन्नमत्ति तेषान्तु त्रिरात्रेण ततः शुचिः ।
अनदन्नन्नमह्नैव न च तस्मिन् गृहे वसन् ॥
सोदरेष्वेतदेव स्यान्मातुराप्तेषु बन्धुषु ।
दशाहेन शवस्पर्शी सपिण्डश्चैव शुध्यति ॥
षड्रात्रेणाथवा सर्व्वे त्रिरात्रेणाथवा पुनः ।
अनाथञ्चैव निर्हृत्य ब्राह्मणं धनवर्ज्जितम् ॥
स्नात्वा संप्राश्य तु घृतं शुध्यन्ति ब्राह्मणादयः ।
अवरश्चेद्वरं वर्णमवरं वा वरो यदि ॥
अशौचे संस्पृशेत् स्नेहात्तदाशौचेन शुध्यति ॥*॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः ।
स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥
एकाहात् क्षत्त्रिये शुद्धिर्वैश्यानां स्यात् द्व्यहेन तु ।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः ॥*॥
अनस्थिसञ्चिते शूद्रे रौति चेद्ब्राह्मणः स्वकैः ।
त्रिरात्रं स्यादथाशौचमेकाहं त्वन्यथा स्मृतम् ॥
अस्थिसञ्चयनादर्व्वागेकाहं वैश्यशूद्रयोः ।
अन्यथा चैव सज्योतिर्ब्राह्मणे स्नानमेव तु ॥
अनस्थिसञ्चिते विप्रे ब्राह्मणो रौति चेत्तदा ।
स्नानेनैतद्भवेच्छुद्धिः सचेलेन न संशयः ॥*॥
यस्तैः सहाशनं कुर्य्याच्छयनादीनि चैव हि ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥*॥
यस्तेषामन्नमश्नाति सकृदेवापि कामतः ।
तदाशौचे निवृत्तेऽसौ स्नानं कृत्वा विशुध्यति ॥
यावत्तदन्नमश्नाति दुर्भिक्षोपहतो नरः ।
तावन्त्यहान्यशौचं स्यात् प्रायश्चित्तं ततश्चरेत् ॥
दाहाद्यशौचं कर्त्तव्यं द्विजानामग्निहोत्रिणाम् ।
सपिण्डानान्तु मरणे मरणादितरेषु च ॥*॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
लेपभाजश्चतुर्थाद्याः सापिण्ड्यं साप्तपौरुषम् ॥
अनूढ़ानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम् ।
जायानां भर्त्तृसापिण्ड्यं प्राह देवः पितामहः ॥
ये चैकजाता बहवो भिन्नयोनय एव च ।
भिन्नवर्णास्तु सापिण्ड्यं भवेत्तेषां त्रिपौरुषम् ॥*॥
कारवः शिल्पिनो वैद्या दासी दासस्तथैव च ।
दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ ॥
सत्रिणो व्रतिनस्तावत् सद्यःशौचा उदाहृताः ।
राजा चैवाभिषिक्तश्च विप्राः सत्रिण एव च ॥
यज्ञे विवाहकाले च देवयागे तथैव च ।
सद्यःशौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्द्विजैः ।
सद्यःशौचं समाख्यातमन्नातिमरणे तथा ॥
अग्नौ मरुप्रपतने वीराध्वन्यप्यनाशके ।
ब्राह्मणार्थे च संन्यस्ते सद्यःशौचं विधीयते ॥*॥
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाशौचं कीर्त्तितं सद्भिः पतिते च तथा मृते ॥
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ॥
व्यापादयेद्यथात्मानं स्वयं योऽग्निविषादिभिः ।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकादिकम् ॥*॥
अथ कश्चित् प्रमादेन म्रियतेऽग्निविषादिभिः ।
तस्याशौचं विधातव्यं कार्य्यञ्चैवोदकादिकम् ॥*॥
जाते कुमारे तदहः कामं कुर्य्यात् प्रतिग्रहम् ।
हिरण्यधान्यगोवासस्तिलान्नगुड़सर्पिषाम् ॥
फलानि पुष्पं शाकञ्च लवणं काष्ठमेव च ।
तोयं दधि घृतं क्षीरमौषधं तैलमेव च ।